**श्री मृतसञ्जीवन स्तोत्र ||**

एवमारध्य गौरीशं देवं मृत्युञ्जयमेश्वरं।

मृतसञ्जीवनं नाम्ना कवचं प्रजपेत् सदा ॥१॥

सारात् सारतरं पुण्यं गुह्यादगुह्यतरं शुभं ।

महादेवस्य कवचं मृतसञ्जीवनामकं ॥ २॥

समाहितमना भूत्वा शृणुष्व कवचं शुभं ।

शृत्वैतद्दिव्य कवचं रहस्यं कुरु सर्वदा ॥३॥

वराभयकरो यज्वा सर्वदेवनिषेवितः ।

मृत्युञ्जयो महादेवः प्राच्यां मां पातु सर्वदा ॥४॥

दधाअनः शक्तिमभयां त्रिमुखं षड्भुजः प्रभुः।

सदाशिवोऽग्निरूपी मामाग्नेय्यां पातु सर्वदा ॥५॥

अष्टदसभुजोपेतो दण्डाभयकरो विभुः ।

यमरूपि महादेवो दक्षिणस्यां सदावतु ॥६॥

खड्गाभयकरो धीरो रक्षोगणनिषेवितः ।

रक्षोरूपी महेशो मां नैरृत्यां सर्वदावतु ॥७॥

पाशाभयभुजः सर्वरत्नाकरनिषेवितः ।

वरुणात्मा महादेवः पश्चिमे मां सदावतु ॥८॥

गदाभयकरः प्राणनायकः सर्वदागतिः ।

वायव्यां मारुतात्मा मां शङ्करः पातु सर्वदा ॥९॥

शङ्खाभयकरस्थो मां नायकः परमेश्वरः ।

सर्वात्मान्तरदिग्भागे पातु मां शङ्करः प्रभुः ॥१०॥

शूलाभयकरः सर्वविद्यानमधिनायकः ।

ईशानात्मा तथैशान्यां पातु मां परमेश्वरः ॥११॥

ऊर्ध्वभागे ब्रःमरूपी विश्वात्माऽधः सदावतु ।

शिरो मे शङ्करः पातु ललाटं चन्द्रशेखरः॥१२॥

भ्रूमध्यं सर्वलोकेशस्त्रिणेत्रो लोचनेऽवतु ।

भ्रूयुग्मं गिरिशः पातु कर्णौ पातु महेश्वरः ॥१३॥

नासिकां मे महादेव ओष्ठौ पातु वृषध्वजः ।

जिह्वां मे दक्षिणामूर्तिर्दन्तान्मे गिरिशोऽवतु ॥१४॥
मृतुय्ञ्जयो मुखं पातु कण्ठं मे नागभूषणः।
पिनाकि मत्करौ पातु त्रिशूलि हृदयं मम ॥१५॥
पञ्चवक्त्रः स्तनौ पातु उदरं जगदीश्वरः ।
नाभिं पातु विरूपाक्षः पार्श्वौ मे पार्वतीपतिः ॥१६॥
कटद्वयं गिरीशौ मे पृष्ठं मे प्रमथाधिपः।
गुह्यं महेश्वरः पातु ममोरू पातु भैरवः ॥१७॥
जानुनी मे जगद्धर्ता जङ्घे मे जगदम्बिका ।
पादौ मे सततं पातु लोकवन्द्यः सदाशिवः ॥१८॥
गिरिशः पातु मे भार्यां भवः पातु सुतान्मम ।
मृत्युञ्जयो ममायुष्यं चित्तं मे गणनायकः ॥१९॥
सर्वाङ्गं मे सदा पातु कालकालः सदाशिवः ।
एतत्ते कवचं पुण्यं देवतानां च दुर्लभम् ॥२०॥
मृतसञ्जीवनं नाम्ना महादेवेन कीर्तितम् ।

सहस्रावर्तनं चास्य पुरश्चरणमीरितम् ॥२१॥

यः पठेच्छृणुयान्नित्यं श्रावयेत्सु समाहितः ।

सकालमृत्युं निर्जित्य सदायुष्यं समश्नुते ॥२२॥

हस्तेन वा यदा स्पृष्ट्वा मृतं सञ्जीवयत्यसौ ।

आधयोव्याध्यस्तस्य न भवन्ति कदाचन ॥२३॥

कालमृयुमपि प्राप्तमसौ जयति सर्वदा ।

अणिमादिगुणैश्वर्यं लभते मानवोत्तमः ॥२४॥

युद्वारम्भे पठित्वेदमष्टाविशतिवारकं ।

युद्वमध्ये स्थितः शत्रुः सद्यः सर्वैर्न दृश्यते ॥२५॥

न ब्रह्मादीनि चास्त्राणि क्षयं कुर्वन्ति तस्य वै ।

विजयं लभते देवयुद्वमध्येऽपि सर्वदा ॥२६॥

प्रातरूत्थाय सततं यः पठेत्कवचं शुभं ।

अक्षय्यं लभते सौख्यमिह लोके परत्र च ॥२७॥

सर्वव्याधिविनिर्मृक्तः सर्वरोगविवर्जितः ।

अजरामरणो भूत्वा सदा षोडशवार्षिकः ॥२८॥

विचरव्यखिलान् लोकान् प्राप्य भोगांश्च दुर्लभान् ।

तस्मादिदं महागोप्यं कवचम् समुदाहृतम् ॥२९॥

मृतसञ्जीवनं नाम्ना देवतैरपि दुर्लभम् ॥३०॥

ईती श्री वसिष्ठ कृत मृतसञ्जीवन स्तोत्रं संपूर्ण ॥

॥ श्रीगुरुदत्तात्रेयार्पणमस्तु ॥

||श्री स्वामी समर्थापर्ण मस्तु||